एकः परमः देवभक्तः अस्ति। सः प्रतिदिने भक्त्या देवस्य प्रार्थनाम् करोति। ”देव, कृपया मह्यं आरोग्यम् ददातु, धनम् ददातु” इति। सः किंचित् अपि प्रयत्नम् न करोति, कार्यम् न करोति। देवः साहाय्यम् करिष्यति इति तस्य विश्वासः।

एकस्मिन् दिने सः वृषभशकटे गच्छति स्म। मृण्मार्गः आसीत्। तदा वृष्टेः आरंम्भः अभवत्। घटिकात्रयं वृष्टिः निरंतरम् आगतवती। तदा तस्य षकटस्य चक्रम् मार्गे अन्तः गतम्। सः उपविश्य ”देव, कृपया साहाय्यम् करोतु, अहम् परमभक्तः अस्मि। कृपया साहाय्यम् करोतु” इति प्रार्थनाम् कृतवान्।

तदा मार्गे एकः सज्जनः आगतवान्। भक्तम् दृष्ट्वा पृष्टवान् ”भो मित्र, किंचित् साहाय्यम् आवश्यकम् वा ?” इति। तदा भक्तः उक्तवान् ”भवतः साहाय्यम् न आवश्यकम्। देवः अस्ति। सः एव साहाय्यम् करोति” इति। तदा सज्जनः गतवान्।

किंचित समयानंतरम्, अन्यः एकः आगतवान्। सः अपि तदैव पृष्टवान् ”भो मित्र, किंचित् साहाय्यम् आवश्यकम् वा ?” इति। तदा भक्तः उक्तवान् ”भवतः साहाय्यम् न आवश्यकम्। देवः अस्ति। सः एव साहाय्यम् करोति” इति। सः अपि गतवान्।

इदानिम वृष्टिः अधिका अभवत्। जलम् तस्य कन्ठपर्यंतम् आगतम्। तदा पुनः एकः आगतवान्, पृष्टवान् च ””भो मित्र, किंचित् साहाय्यम् आवश्यकम् वा ?” इति। तदा भक्तः पुनः उक्तवान् स ”भवतः साहाय्यम् न आवश्यकम्। देवः अस्ति। सः एव साहाय्यम् करोति” इति। सः अपि गतवान्।

वृष्टिः अधिका अभवत्। सः जले मृतवान्।

तदा सः स्वर्गम् गतवान्। सः देवम् पृष्टवान् ”देव, अहम् भवतः परमभक्तः। यदा मम कष्टः अभवत्, भवान् किंचित् अपि साहाय्यम् न कृतवान्। भवान् द्रष्टुम् अपि न आगतवान्। किमर्थम् ?”

तदा देवः उक्तवान् ”भो भक्त, अहम् त्रिवारम् आगतवान्। पृष्टवान् च। ’साहाय्यम् अवश्यकम् वा ?” इति। परंतु भवान् न स्वीकृतवान्। यदि भवान् प्रयत्नम् एव न करोति चेत्, अहम् कथम् साहाय्यम् करोमि ?”

तदा भक्तस्य ज्ञानोदयः अभवत्। यदि वयम् प्रयत्नम् कुर्मः, तर्हि एव देवः साहाय्यम् करोति।

उद्यमः साहसम् धैर्यम् बुद्धिः शक्तिः पराक्रमः ।
षडेते यत्र वर्तन्ते तत्र देवः साहाय्यकृत् ॥